स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः । स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥

The Mantra without meters (Sanskrit)

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः । स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥

The Mantra's transliteration in English

tam asmerā yuvatayo yuvānam marmṛjyamānāḥ pari yanty āpaḥ | sa śukrebhiḥ śikvabhī revad asme dīdāyānidhmo ghṛtanirṇig apsu ||

The Pada Paath (Sanskrit)

तम् । अस्मेराः । युवतयः । युवानम् । मर्मृज्यमानाः । परि । यन्ति । आपः । सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्निक् । अप्ऽसु ॥

The Pada Paath - transliteration

tam | asmerāḥ | yuvatayaḥ | yuvānam | marmṛjyamānāḥ | pari | yanti | āpaḥ | saḥ | śukrebhiḥ | śikva-bhiḥ | revat | asme iti | dīdāya | anidhmaḥ | ghṛta-nirnik | ap-su

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-005

MANTRA NUMBER:

Mantra 5 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 5 of Varga 22 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 35 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मै ति॒स्रो अ॑व्य॒थ्याय॒ नारी॑र्दे॒वाय॑ दे॒वीर्दि॑धिष॒न्त्यन्न॑म् । कृता॑ इ॒वोप॒ हि प्र॑स॒र्स्रे अ॒प्सु स पी॒यूषं॑ धयति पू॒र्वसू॒नाम् ॥

The Mantra without meters (Sanskrit)

अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् । कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥

The Mantra's transliteration in English

asmai tisro avyathyāya nārīr devāya devīr didhiṣanty annam | kṛtā ivopa hi prasarsre apsu sa pīyūṣaṁ dhayati pūrvasūnām ||

The Pada Paath (Sanskrit)

अ॒स्मै । ति॒स्रः । अ॒व्य॒थ्याय॑ । नारीः॑ । दे॒वाय॑ । दे॒वीः । दि॒धि॒ष॒न्ति॒ । अन्न॑म् । कृताः॑ऽइव । उप॑ । हि । प्र॒ऽस॒र्स्रे । अ॒प्ऽसु । सः । पी॒यूष॑म् । ध॒य॒ति॒ । पू॒र्व॒ऽसू॒नाम् ॥

The Pada Paath - transliteration

asmai | tisraḥ | avyathyāya | nārīḥ | devāya | devīḥ | didhiṣanti | annam | kṛtāiva | upa | hi | pra-sarsre | ap-su | saḥ | pīyūṣam | dhayati | pūrva-sūnām

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-006

MANTRA NUMBER:

Mantra 6 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 1 of Varga 23 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 36 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्दः (Chhand) :- निचृत्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अश्व॒स्यात्र॒ जनि॑मा॒स्य च॒ स्व॑र्द्रु॒हो रि॒षः स॒म्पृच॑: पाहि सू॒रीन् । आ॒मासु॑ पू॒र्षु प॒रो अ॑प्रमृ॒ष्यं नारा॑तयो॒ वि न॑श॒न्नानृ॑तानि ॥

The Mantra without meters (Sanskrit)

अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः सम्पृचः पाहि सूरीन् । आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥

The Mantra's transliteration in English

aśvasyātra janimāsya ca svar druho riṣaḥ sampṛcaḥ pāhi sūrīn | āmāsu pūrṣu paro apramṛṣyaṁ nārātayo vi naśan nānṛtāni ||

The Pada Paath (Sanskrit)

अश्व॑स्य । अत्र॑ । जनि॑म । अ॒स्य । च॒ । स्वः॑ । द्रु॒हः । रि॒षः । स॒म्ऽपृचः॑ । पा॒हि॒ । सू॒रीन् । आ॒मासु॑ । पू॒र्षु । प॒रः । अ॒प्र॒ऽमृ॒ष्यम् । न । अरा॑तयः । वि । न॒श॒न् । न । अनृ॑तानि ॥

The Pada Paath - transliteration

aśvasya | atra | janima | asya | ca | svaḥ | druhaḥ | riṣaḥ | sam-pṛcaḥ | pāhi | sūrīn | āmāsu | pūrṣu | paraḥ | apra-mṛṣyam | na | arātayaḥ | vi | naśan | na | anṛtāni

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-007

MANTRA NUMBER:

Mantra 7 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 2 of Varga 23 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 37 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स्व आ दमे॑ सु॒दुघा॒ यस्य॑ धे॒नुः स्व॒धां॑ पीपाय सु॒भ्वन्न॑मत्ति । सो अ॒पां नपा॑दू॒र्जय॑न्न॒प्स्व१॒॑न्तर्व॑सु॒देया॑य विध॒ते वि भा॑ति ॥

The Mantra without meters (Sanskrit)

स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति । सो अपां नपादूर्जयन्नप्स्वन्तर्वसुदेयाय विधते वि भाति ॥

The Mantra's transliteration in English

sva ā dame sudughā yasya dhenuḥ svadhām pīpāya subhv annam atti | so apāṁ napād ūrjayann apsv antar vasudeyāya vidhate vi bhāti ||

The Pada Paath (Sanskrit)

स्वे । आ । दमे॑ । सु॒ऽदुघा॑ । यस्य॑ । धे॒नुः । स्व॒धाम् । पी॒पा॒य॒ । सु॒ऽभु । अन्न॑म् । अ॒त्ति॒ । सः । अ॒पाम् । नपा॑त् । ऊ॒र्जय॑न् । अ॒प्ऽसु । अ॒न्तः । व॒सु॒ऽदेया॑य । वि॒ध॒ते । वि । भा॒ति॒ ॥

The Pada Paath - transliteration

sve | ā | dame | su-dughā | yasya | dhenuḥ | svadhām | pīpāya | su-bhu | annam | atti | saḥ | apām | napāt | ūrjayan | ap-su | antaḥ | vasu-deyāya | vidhate | vi | bhāti

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-008

MANTRA NUMBER:

Mantra 8 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 3 of Varga 23 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 38 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

यो अ॒प्स्वा शुचि॑ना॒ दैव्ये॑न ऋ॒तावाज॑स्र उ॒र्वि॒या वि॒भाति॑ । व॒या इद॒न्या भुव॑नान्यस्य॒ प्र जा॑यन्ते वी॒रुध॑श्च प्र॒जाभि॑: ॥

The Mantra without meters (Sanskrit)

यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति । वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥

The Mantra's transliteration in English

yo apsv ā śucinā daivyena ṛtāvājasra urviyā vibhāti | vayā id anyā bhuvanāny asya pra jāyante vīrudhaś ca prajābhiḥ ||

The Pada Paath (Sanskrit)

यः । अ॒प्ऽसु । आ । शुचि॑ना । दैव्ये॑न । ऋ॒तऽवा॑ । अज॑स्रः । उ॒र्वि॒या । वि॒ऽभाति॑ । व॒याः । इत् । अ॒न्या । भुव॑नानि । अ॒स्य॒ । प्र । जा॒य॒न्ते॒ । वी॒रुधः॑ । च॒ । प्र॒ऽजाभिः॑ ॥

The Pada Paath - transliteration

yaḥ | ap-su | ā | śucinā | daivyena | ṛta-vā | ajasraḥ | urviyā | vi-bhāti | vayāḥ | it | anyā | bhuvanāni | asya | pra | jāyante | vīrudhaḥ | ca | pra-jābhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-009

MANTRA NUMBER:

Mantra 9 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 4 of Varga 23 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 39 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः । तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥

The Mantra without meters (Sanskrit)

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः । तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥

The Mantra's transliteration in English

apāṁ napād ā hy asthād upasthaṁ jihmānām ūrdhvo vidyutaṁ vasānaḥ | tasya jyeṣṭham mahimānaṁ vahantīr hiraṇyavarṇāḥ pari yanti yahvīḥ ||

The Pada Paath (Sanskrit)

अपाम् । नपात् । आ । हि । अस्थात् । उपऽस्थम् । जिह्मानाम् । ऊर्ध्वः । विद्युतम् । वसानः । तस्य । ज्येष्ठम् । म्हिमानम् । वहन्तीः । हिरण्यऽवर्णाः । परि । यन्ति । यह्वीः ॥

The Pada Paath - transliteration

apām | napāt | ā | hi | asthāt | upa-stham | jihmānām | ūrdhvaḥ | vidyutam | vasānaḥ | tasya | jyeṣṭham | mhimānam | vahantīḥ | hiraṇya-varṇāḥ | pari | yanti | yahvīḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-010

MANTRA NUMBER:

Mantra 10 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 5 of Varga 23 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 40 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

हिर॑ण्यरूपः॒ स हिर॑ण्यसंदृग॒पां नपा॒त्सेदु॒ हिर॑ण्यवर्णः । हि॒र॒ण्यया॒त्परि॒ योने॑र्नि॒षद्या॑ हिरण्य॒दा द॑द॒त्यन्न॑मस्मै ॥

The Mantra without meters (Sanskrit)

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः । हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥

The Mantra's transliteration in English

hiraṇyarūpaḥ sa hiraṇyasaṁdṛg apāṁ napāt sed u hiraṇyavarṇaḥ | hiraṇyayāt pari yoner niṣadyā hiraṇyadā dadaty annam asmai ||

The Pada Paath (Sanskrit)

हिर॑ण्यऽरूपः । सः । हिर॑ण्यऽसन्दृक् । अ॒पाम् । नपा॑त् । सः । इत् । ऊँ॒ इति॑ । हिर॑ण्यऽवर्णः । हि॒र॒ण्यया॒त् । परि॑ । योनेः॑ । नि॒ऽसद्य॑ । हि॒र॒ण्य॒ऽदाः । द॒द॒ति॒ । अन्न॑म् । अ॒स्मै॒ ॥

The Pada Paath - transliteration

hiraṇya-rūpaḥ | saḥ | hiraṇya-sandṛk | apām | napāt | saḥ | it | oṃ iti | hiraṇya-varṇaḥ | hiraṇyayāt | pari | yoneḥ | ni-sadya | hiraṇya-dāḥ | dadati | annam | asmai

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-011

MANTRA NUMBER:

Mantra 11 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 1 of Varga 24 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 41 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् । यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥

The Mantra without meters (Sanskrit)

तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् । यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥

The Mantra's transliteration in English

tad asyānīkam uta cāru nāmāpīcyaṁ vardhate naptur apām | yam indhate yuvatayaḥ sam itthā hiraṇyavarṇaṁ ghṛtam annam asya ||

The Pada Paath (Sanskrit)

तत् । अस्य । अनीकम् । उत । चारु । नाम । अपीच्यम् । वर्धते । नप्तुः । अपाम् । यम् । इन्धते । युवतयः । सम् । इत्था । हिरण्यऽवर्णम् । घृतम् । अन्नम् । अस्य ॥

The Pada Paath - transliteration

tat | asya | anīkam | uta | cāru | nāma | apīcyam | vardhate | naptuḥ | apām | yam | indhate | yuvatayaḥ | sam | itthā | hiraṇya-varṇam | ghṛtam | annam | asya

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-012

MANTRA NUMBER:

Mantra 12 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 2 of Varga 24 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 42 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मै ब॑हू॒नाम॑व॒माय॒ सख्ये॑ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भिः॑ । सं सानु॒ मार्ज्मि॒ दिधि॑षामि॒ बिल्मै॒र्दधा॒म्यन्नैः॒ परि॑ वन्द ऋ॒ग्भिः ॥

The Mantra without meters (Sanskrit)

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः । सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः ॥

The Mantra's transliteration in English

asmai bahūnām avamāya sakhye yajñair vidhema namasā havirbhiḥ | saṁ sānu mārjmi didhiṣāmi bilmair dadhāmy annaiḥ pari vanda ṛgbhiḥ ||

The Pada Paath (Sanskrit)

अ॒स्मै । ब॒हू॒नाम् । अ॒व॒माय॑ । सख्ये॑ । य॒ज्ञैः । वि॒धे॒म॒ । नम॑सा । ह॒विःऽभिः॑ । सम् । सानु॑ । मार्ज्मि॑ । दिधि॑षामि । बिल्मैः॑ । दधा॑मि । अन्नैः॑ । परि॑ । व॒न्दे॒ । ऋ॒क्ऽभिः ॥

The Pada Paath - transliteration

asmai | bahūnām | avamāya | sakhye | yajñaiḥ | vidhema | namasā | haviḥ-bhiḥ | sam | sānu | mārjmi | didhiṣāmi | bilmaiḥ | dadhāmi | annaiḥ | pari | vande | ṛk-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-013

MANTRA NUMBER:

Mantra 13 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 3 of Varga 24 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 43 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स ईं वृषा॑जनय॒त्तासु॒ गर्भं॒ स ईं शिशु॑र्धयति॒ तं रि॑हन्ति । सो अ॒पां नपा॒दन॑भिम्लातवर्णो॒ऽन्यस्ये॑वे॒ह त॒न्वा॑ विवेष ॥

The Mantra without meters (Sanskrit)

स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति । सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥

The Mantra's transliteration in English

sa īṁ vṛṣājanayat tāsu garbhaṁ sa īṁ śiśur dhayati taṁ rihanti | so apāṁ napād anabhimlātavarṇo 'nyasyeveha tanvā viveṣa ||

The Pada Paath (Sanskrit)

सः । ई॒म् । वृषा॑ । अ॒ज॒न॒य॒त् । तासु॑ । गर्भ॑म् । सः । ई॒म् । शिशुः॑ । ध॒य॒ति॒ । तम् । रि॒ह॒न्ति॒ । सः । अ॒पाम् । नपा॑त् । अन॑भिम्लातऽवर्णः । अ॒न्यस्य॑ऽइव । इ॒ह । त॒न्वा॑ । वि॒वे॒ष ॥

The Pada Paath - transliteration

saḥ | īm | vṛṣā | ajanayat | tāsu | garbham | saḥ | īm | śiśuḥ | dhayati | tam | rihant i | saḥ | apām | napāt | anabhimlāta-varṇaḥ | anyasya-iva | iha | tanvā | v iveṣa

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-014

MANTRA NUMBER:

Mantra 14 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 4 of Varga 24 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 44 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मिन्प॒दे प॑र॒मे त॑स्थि॒वांस॑मध्व॒स्मभि॑र्वि॒श्वहा॑ दीदि॒वांस॑म् । आपो॒ नप्त्रे॑ घृ॒तमन्नं॒ वह॑न्तीः स्व॒यमत्कैः॒ परि॑ दीयन्ति य॒ह्वीः ॥

The Mantra without meters (Sanskrit)

अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् । आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥

The Mantra's transliteration in English

asmin pade parame tasthivāṁsam adhvasmabhir viśvahā dīdivāṁsam | āpo naptre ghṛtam annaṁ vahantīḥ svayam atkaiḥ pari dīyanti yahvīḥ ||

The Pada Paath (Sanskrit)

अ॒स्मिन् । प॒दे । प॒र॒मे । त॒स्थि॒ऽवांस॑म् । अ॒ध्व॒स्मऽभिः॑ । वि॒श्वहा॑ । दीदि॒ऽवांस॑म् । आपः॑ । नप्त्रे॑ । घृ॒तम् । अन्न॑म् । वह॑न्तीः । स्व॒यम् । अत्कैः॑ । परि॑ । दी॒य॒न्ति॒ । य॒ह्वीः ॥

The Pada Paath - transliteration

asmin | pade | parame | tasthi-vāṃsam | adhvasma-bhiḥ | viśvahā | dīdi-vāṃsam | āpaḥ | naptre | ghṛtam | annam | vahantīḥ | svayam | atkaiḥ | pari | dīyanti | yahvīḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-035/mantra-rig-02-035-015

MANTRA NUMBER:

Mantra 15 of Sukta 35 of Mandal 2 of Rig Veda
Mantra 5 of Varga 24 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 45 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अपान्नपात्

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् । विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

The Mantra without meters (Sanskrit)

अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् । विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥

The Mantra's transliteration in English

ayāṁsam agne sukṣitiṁ janāyāyāṁsam u maghavadbhyaḥ suvṛktim | viśvaṁ tad bhadraṁ yad avanti devā bṛhad vadema vidathe suvīrāḥ ||

The Pada Paath (Sanskrit)

अयांसम् । अग्ने । सुऽक्षितिम् । जनाय । अयांसम् । ऊँ इति । मघवत्ऽभ्यः । सुऽवृक्तिम् । विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥

The Pada Paath - transliteration

ayāṃsam | agne | su-kṣitim | janāya | ayāṃsam | oṃ iti | maghavat-bhyaḥ | su-vṛktim | viśvam | tat | bhadram | yat | avanti | devāḥ | bṛhat | vadema | vidathe | su-vīrāḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-001

MANTRA NUMBER:

Mantra 1 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 1 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 46 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- इन्द्रो मधुश्च

छन्दः (Chhand) :- स्वराट्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः । पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥

The Mantra without meters (Sanskrit)

तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः । पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥

The Mantra's transliteration in English

tubhyaṁ hinvāno vasiṣṭa gā apo 'dhukṣan sīm avibhir adribhir naraḥ | pibendra svāhā prahutaṁ vaṣaṭkṛtaṁ hotrād ā somam prathamo ya īśiṣe ||

The Pada Paath (Sanskrit)

तुभ्यम् । हिन्वानः । वसिष्ट । गाः । अपः । अधुक्षन् । सीम् । अविऽभिः । अद्रिऽभिः । नरः । पिब । इन्द्र । स्वाहा । प्रऽहुतम् । वषट्ऽकृतम् । होत्रात् । आ । सोमम् । प्रथमः । यः । ईशिषे ॥

The Pada Paath - transliteration

tubhyam | hinvānaḥ | vasiṣṭa | gāḥ | apaḥ | adhukṣan | sīm | avi-bhiḥ | adri-bhiḥ | naraḥ | piba | indra | svāhā | pra-hutam | vaṣaṭ-kṛtam | hotrāt | ā | somam | prathamaḥ | yaḥ | īśiṣe

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-002

MANTRA NUMBER:

Mantra 2 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 2 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 47 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- मरुतो माधवश्च

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

य॒ज्ञैः सम्मि॑श्ला॒: पृष॑तीभिर्ऋ॒ष्टिभि॒र्याम॑ञ्छु॒भ्रासो॑ अ॒ञ्जिषु॑ प्रि॒या उ॒त । आ॒सद्या॑ ब॒र्हिर्भ॑रतस्य सूनवः पो॒त्रादा सोम॑ पिबता दिवो नरः ॥

The Mantra without meters (Sanskrit)

यज्ञैः सम्मिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत । आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥

The Mantra's transliteration in English

yajñaiḥ sammiślāḥ pṛṣatībhir ṛṣṭibhir yāmañ chubhrāso añjiṣu priyā uta | āsadyā barhir bharatasya sūnavaḥ potrād ā somam pibatā divo naraḥ ||

The Pada Paath (Sanskrit)

य॒ज्ञैः । सम्ऽमि॑श्लाः । पृष॑तीभिः । ऋ॒ष्टिऽभिः॑ । याम॑न् । शु॒भ्रासः॑ । अ॒ञ्जिषु॑ । प्रि॒याः । उ॒त । आ॒ऽसद्य॑ । ब॒र्हिः । भ॒र॒त॒स्य॒ । सू॒न॒वः॒ । पो॒त्रात् । आ । सोम॑म् । पि॒ब॒त॒ । दि॒वः॒ । न॒रः॒ ॥

The Pada Paath - transliteration

yajñaiḥ | sam-miślāḥ | pṛṣatībhiḥ | ṛṣṭi-bhiḥ | yāman | śubhrāsaḥ | añjiṣu | priyāḥ | uta | āsadya | barhiḥ | bharatasya | sūnavaḥ | potrāt | ā | somam | pibata | divaḥ | naraḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-003

MANTRA NUMBER:

Mantra 3 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 3 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 48 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- त्वष्टा शुक्रश्च

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒मेव॑ नः सुहवा॒ आ हि गन्त॑न॒ नि ब॒र्हिषि॑ सदतना॒ रणि॑ष्टन । अथा॑ मन्दस्व जुजुषा॒णो अन्ध॑स॒स्त्वष्ट॑र्दे॒वेभि॒र्जनि॑भिः सु॒मद्ग॑णः ॥

The Mantra without meters (Sanskrit)

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन । अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥

The Mantra's transliteration in English

ameva naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana | athā mandasva jujuṣāṇo andhasas tvaṣṭar devebhir janibhiḥ sumadgaṇaḥ ||

The Pada Paath (Sanskrit)

अ॒माऽइ॑व । नः॒ । सु॒ऽह॒वाः॒ । आ । हि । गन्त॑न । नि । ब॒र्हिषि॑ । स॒द॒त॒न॒ । रणि॑ष्टन । अथ॑ । म॒न्द॒स्व॒ । जु॒जु॒षा॒णः । अन्ध॑सः । त्वष्टः॑ । दे॒वेभिः॑ । जनि॑ऽभिः । सु॒मत्ऽग॑णः ॥

The Pada Paath - transliteration

amāiva | naḥ | su-havāḥ | ā | hi | gantana | ni | barhiṣi | sadatana | raṇiṣṭana | atha | mandasva | jujuṣāṇaḥ | andhasaḥ | tvaṣṭaḥ | devebhiḥ | jani-bhiḥ | sumat-gaṇaḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-004

MANTRA NUMBER:

Mantra 4 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 4 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 49 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अग्निः शुचिश्च

छन्दः (Chhand) :- स्वराट्त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ व॑क्षि दे॒वाँ इ॒ह वि॑प्र॒ यक्षि॑ चो॒शन्हो॑त॒र्नि ष॑दा॒ योनि॑षु त्रि॒षु । प्रति॑ वीहि॒ प्रस्थि॑तं सो॒म्यं मधु॒ पिबाग्नी॑ध्रा॒त्तव॑ भा॒गस्य॑ तृप्णुहि ॥

The Mantra without meters (Sanskrit)

आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु । प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥

The Mantra's transliteration in English

ā vakṣi devām̐ iha vipra yakṣi cośan hotar ni ṣadā yoniṣu triṣu | prati vīhi prasthitaṁ somyam madhu pibāgnīdhrāt tava bhāgasya tṛpṇuhi ||

The Pada Paath (Sanskrit)

आ । व॒क्षि॒ । दे॒वान् । इ॒ह । वि॒प्र॒ । यक्षि॑ । च॒ । उ॒शन् । हो॒त॒रिति॑ । नि । स॒द॒ । योनि॑षु । त्रि॒षु । प्रति॑ । वी॒हि॒ । प्रऽस्थि॑तम् । सो॒म्यम् । मधु॑ । पि॒ब॒ । आग्नी॑ध्रात् । तव॑ । भा॒गस्य॑ । तृ॒प्णु॒हि॒ ॥

The Pada Paath - transliteration

ā | vakṣi | devān | iha | vipra | yakṣi | ca | uśan | hotaḥ | ni | sada | yoniṣu | triṣu | prati | vīhi | pra-sthitam | somyam | madhu | piba | āgnīdhrāt | tava | bhāgasya | tṛpṇuhi

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-005

MANTRA NUMBER:

Mantra 5 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 5 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 50 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- इन्द्रो नभश्च

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

एष स्य ते तन्वौ नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः । तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥

The Mantra without meters (Sanskrit)

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः । तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥

The Mantra's transliteration in English

eṣa sya te tanvo nṛmṇavardhanaḥ saha ojaḥ pradivi bāhvor hitaḥ | tubhyaṁ suto maghavan tubhyam ābhṛtas tvam asya brāhmaṇād ā tṛpat piba ||

The Pada Paath (Sanskrit)

एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः । प्रऽदिवि । बाह्वोः । हितः । तुभ्यम् । सुतः । मघवन् । तुभ्यम् । आऽभृतः । त्वम् । अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥

The Pada Paath - transliteration

eṣaḥ | syaḥ | te | tanvaḥ | nṛmṇa-vardhanaḥ | sahaḥ | ojaḥ | pra-divi | bāhvoḥ | hitaḥ | tubhyam | sutaḥ | maghavan | tubhyam | ābhṛtaḥ | tvam | asya | brāhmaṇāt | ā | tṛpat | piba

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-036/mantra-rig-02-036-006

MANTRA NUMBER:

Mantra 6 of Sukta 36 of Mandal 2 of Rig Veda
Mantra 6 of Varga 25 of Adhyaya 7 of Ashtak 2 of Rig Veda
Mantra 51 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- मित्रावरुणौ नभस्यश्च

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु । अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥

The Mantra without meters (Sanskrit)

जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु । अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥

The Mantra's transliteration in English

juṣethāṁ yajñam bodhataṁ havasya me satto hotā nividaḥ pūrvyā anu | acchā rājānā nama ety āvṛtam praśāstrād ā pibataṁ somyam madhu ||

The Pada Paath (Sanskrit)

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । सत्तः । होता । निऽविदः । पूर्व्याः । अनु । अच्छ । राजाना । नमः । एति । आऽवृतम् । प्रऽशास्त्रात् । आ । पिबतम् । सोम्यम् । मधु ॥

The Pada Paath - transliteration

juṣethām | yajñam | bodhatam | havasya | me | sattaḥ | hotā | ni-vidaḥ | pūrvyāḥ | anu | accha | rājānā | namaḥ | eti | āvṛtam | pra-śāstrāt | ā | pibatam | somyam | madhu

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-001

MANTRA NUMBER:

Mantra 1 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 1 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 52 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- द्रविणोदाः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् । तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

The Mantra without meters (Sanskrit)

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् । तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

The Mantra's transliteration in English

mandasva hotrād anu joṣam andhaso 'dhvaryavaḥ sa pūrṇāṁ vaṣṭy āsicam | tasmā etam bharata tadvaśo dadir hotrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ||

The Pada Paath (Sanskrit)

मन्दस्व । होत्रात् । अनु । जोषम् । अन्धसः । अध्वर्यवः । सः । पूर्णाम् । वष्टि । आऽसिचम् । तस्मै । एतम् । भरत । तत्ऽवशः । ददिः । होत्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥

The Pada Paath - transliteration

mandasva | hotrāt | anu | joṣam | andhasaḥ | adhvaryavaḥ | saḥ | pūrṇām | vaṣṭi | āsicam | tasmai | etam | bharata | tat-vaśaḥ | dadiḥ | hotrāt | somam | draviṇaḥ-daḥ | piba | ṛtu-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-002

MANTRA NUMBER:

Mantra 2 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 2 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 53 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- द्रविणोदाः

छन्दः (Chhand) :- जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यमु॑ पू॒र्वमहु॑वे॒ तमि॒दं हु॑वे॒ सेदु॒ हव्यो॑ द॒दिर्यो नाम॒ पत्य॑ते । अ॒ध्व॒र्युभि॒: प्रस्थि॑तं सो॒म्यं मधु॑ पो॒त्रात्सोमं॑ द्रविणोद॒: पिब॑ ऋ॒तुभि॑: ॥

The Mantra without meters (Sanskrit)

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते । अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

The Mantra's transliteration in English

yam u pūrvam ahuve tam idaṁ huve sed u havyo dadir yo nāma patyate | adhvaryubhiḥ prasthitaṁ somyam madhu potrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ||

The Pada Paath (Sanskrit)

यम् । ऊँ इति॑ । पू॒र्वम् । अहु॑वे । तम् । इ॒दम् । हु॒वे॒ । सः । इत् । ऊँ इति॑ । हव्यः॑ । द॒दिः । यः । नाम॑ । पत्य॑ते । अ॒ध्व॒र्युऽभिः॑ । प्रऽस्थि॑तम् । सो॒म्यम् । मधु॑ । पो॒त्रात् । सोम॑म् । द्र॒वि॒णः॒ऽदः॒ । पिब॑ । ऋ॒तुऽभिः॑ ॥

The Pada Paath - transliteration

yam | oṃ iti | pūrvam | ahuve | tam | idam | huve | saḥ | it | oṃ iti | havyaḥ | dadiḥ | yaḥ | nāma | patyate | adhvaryu-bhiḥ | pra-sthitam | somyam | madhu | potrāt | somam | draviṇaḥ-daḥ | piba | ṛtu-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-003

MANTRA NUMBER:

Mantra 3 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 3 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 54 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- द्रविणोदाः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते । आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

The Mantra without meters (Sanskrit)

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते । आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥

The Mantra's transliteration in English

medyantu te vahnayo yebhir īyase 'riṣaṇyan vīḻayasvā vanaspate | āyūyā dhṛṣṇo abhigūryā tvaṁ neṣṭrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ||

The Pada Paath (Sanskrit)

मेद्यन्तु । ते । वह्नयः । येभिः । ईयसे । अरिषण्यन् । वीळयस्व । वनस्पते । आऽयूय । धृष्णो इति । अभिऽगूर्य । त्वम् । नेष्ट्रात् । सोमम् । द्रविणःऽदः । पिब । ऋतुऽभिः ॥

The Pada Paath - transliteration

medyantu | te | vahnayaḥ | yebhiḥ | īyase | ariṣaṇyan | vīḻayasva | vanaspate | āyūya | dhṛṣṇo iti | abhi-gūrya | tvam | neṣṭrāt | somam | draviṇaḥ-daḥ | piba | ṛtu-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-004

MANTRA NUMBER:

Mantra 4 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 4 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 55 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- द्रविणोदाः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अपा॒द्धो॒त्रादु॒त पो॒त्राद॑मत्तो॒त ने॒ष्ट्राद॑जुषत॒ प्रयो॑ हि॒तम् । तु॒रीयं॒ पात्र॒ममृ॑क्त॒मम॑र्त्यं द्रविणो॒दाः पि॑बतु द्राविणो॒दसः ॥

The Mantra without meters (Sanskrit)

अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् । तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥

The Mantra's transliteration in English

apād dhotrād uta potrād amattota neṣṭrād ajuṣata prayo hitam | turīyam pātram amṛktam amartyaṁ draviṇodāḥ pibatu drāviṇodasaḥ ||

The Pada Paath (Sanskrit)

अपा॑त् । हो॒त्रात् । उ॒त । पो॒त्रात् । अ॒म॒त्त॒ । उ॒त । ने॒ष्ट्रात् । अ॒जु॒ष॒त॒ । प्रयः॑ । हि॒तम् । तु॒रीय॑म् । पात्र॑म् । अमृ॑क्तम् । अम॑र्त्यम् । द्र॒वि॒णः॒ऽदाः॒ । पि॒ब॒तु॒ । द्रा॒वि॒णो॒द॒सः ॥

The Pada Paath - transliteration

apāt | hotrāt | uta | potrāt | amatta | uta | neṣṭrāt | ajuṣata | prayaḥ | hitam | turīyam | pātram | amṛktam | amartyam | draviṇaḥ-dāḥ | pibatu | drāviṇodasaḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-005

MANTRA NUMBER:

Mantra 5 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 5 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 56 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒र्वाञ्च॑म॒द्य य॒य्यं॑ नृ॒वाह॑णं॒ रथं॑ युञ्जाथामि॒ह वां॑ वि॒मोच॑नम् । पृ॒ङ्क्तं ह॒वींषि॒ मधु॑ना॒ हि कं॑ ग॒तमथा॒ सोमं॑ पिबतं वाजिनीवसू ॥

The Mantra without meters (Sanskrit)

अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् । पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥

The Mantra's transliteration in English

arvāñcam adya yayyaṁ nṛvāhaṇaṁ rathaṁ yuñjāthām iha vāṁ vimocanam | pṛṅktaṁ havīṁṣi madhunā hi kaṁ gatam athā somam pibataṁ vājinīvasū ||

The Pada Paath (Sanskrit)

अ॒र्वाञ्च॑म् । अ॒द्य । य॒य्य॑म् । नृ॒ऽवाह॑नम् । रथ॑म् । यु॒ञ्जा॒था॒म् । इ॒ह । वा॒म् । वि॒ऽमोच॑नम् । पृ॒ङ्क्तम् । ह॒वींषि । म॒धु॑ना । आ । हि । क॒म् । ग॒तम् । अथ॑ । सोम॑म् । पि॒ब॒त॒म् । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू ॥

The Pada Paath - transliteration

arvāñcam | adya | yayyam | nṛ-vāhanam | ratham | yuñjāthām | iha | vām | vi-mocanam | pṛṅktam | havīṃṣi | madhunā | ā | hi | kam | gatam | atha | somam | pibatam | vājinīvasūitivājinī-vasū

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-037/mantra-rig-02-037-006

MANTRA NUMBER:

Mantra 6 of Sukta 37 of Mandal 2 of Rig Veda
Mantra 6 of Varga 1 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 57 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् । विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥

The Mantra without meters (Sanskrit)

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् । विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥

The Mantra's transliteration in English

joṣy agne samidhaṁ joṣy āhutiṁ joṣi brahma janyaṁ joṣi suṣṭutim | viśvebhir viśvām̐ ṛtunā vaso maha uśan devām̐ uśataḥ pāyayā haviḥ ||

The Pada Paath (Sanskrit)

जोषि । अग्ने । सम्ऽइधम् । जोषि । आऽहुतिम् । जोषि । ब्रह्म । जन्यम् । जोषि । सुऽस्तुतिम् । विश्वेभिः । विश्वान् । ऋतुना । वसो इति । महः । उशन् । देवान् । उशतः । पायय । हविः ॥

The Pada Paath - transliteration

joṣi | agne | sam-idham | joṣi | āhutim | joṣi | brahma | janyam | joṣi | su-stutim | viśvebhiḥ | viśvān | ṛtunā | vaso iti | mahaḥ | uśan | devān | uśataḥ | pāyaya | haviḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-001

MANTRA NUMBER:
Mantra 1 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 1 of Varga 2 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 58 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उदु ष्य देवः स॑वि॒ता स॒वाय॑ शश्वत्त॒मं तद॑पा॒ वह्नि॑रस्थात् । नू॒नं दे॒वेभ्यो॒ वि हि धाति॒ रत्न॒मथाभ॑जद्वी॒तिहौ॑त्रं स्व॒स्तौ ॥

The Mantra without meters (Sanskrit)

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् । नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥

The Mantra's transliteration in English

ud u ṣya devaḥ savitā savāya śaśvattamaṁ tadapā vahnir asthāt | nūnaṁ devebhyo vi hi dhāti ratnam athābhajad vītihotraṁ svastau ||

The Pada Paath (Sanskrit)

उत् । ऊँ इति॑ । स्यः । दे॒वः । स॒वि॒ता । स॒वाय॑ । श॒श्व॒त्ऽत॒मम् । तत्ऽअ॑पाः । वह्निः॑ । अ॒स्था॒त् । नू॒नम् । दे॒वेभ्यः॑ । वि । हि । धाति॑ । रत्न॑म् । अथ॑ । अ॒भ॒ज॒त् । वी॒तिऽहौ॑त्रम् । स्व॒स्तौ ॥

The Pada Paath - transliteration

ut | oṃ iti | syaḥ | devaḥ | savitā | savāya | śaśvat-tamam | tat-apāḥ | vahniḥ | asthāt | nūnam | devebhyaḥ | vi | hi | dhāti | ratnam | atha | abhajat | vīti-hotram | svastau

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-002

MANTRA NUMBER:

Mantra 2 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 2 of Varga 2 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 59 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विश्व॑स्य॒ हि श्रु॒ष्टये॑ दे॒व ऊ॒र्ध्वः प्र बा॒हवा॑ पृ॒थुपा॑णि॒: सिस॑र्ति । आप॑श्चिदस्य व्र॒त आ निमृ॑ग्रा अ॒यं चि॒द्वातो॑ रमते॒ परि॑ज्मन् ॥

The Mantra without meters (Sanskrit)

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति । आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥

The Mantra's transliteration in English

viśvasya hi śruṣṭaye deva ūrdhvaḥ pra bāhavā pṛthupāṇiḥ sisarti | āpaś cid asya vrata ā nimṛgrā ayaṁ cid vāto ramate parijman ||

The Pada Paath (Sanskrit)

विश्व॑स्य । हि । श्रु॒ष्टये॑ । दे॒वः । ऊ॒र्ध्वः । प्र । बा॒हवा॑ । पृ॒थुऽपा॑णिः । सिस॑र्ति । आपः॑ । चि॒त् । अ॒स्य॒ । व्र॒ते । आ । निऽमृ॑ग्राः । अ॒यम् । चि॒त् । वातः॑ । र॒म॒ते॒ । परि॑ऽज्मन् ॥

The Pada Paath - transliteration

viśvasya | hi | śruṣṭaye | devaḥ | ūrdhvaḥ | pra | bāhavā | pṛthu-pāṇiḥ | sisarti | āpaḥ | cit | asya | vrate | ā | ni-mṛgrāḥ | ayam | cit | vātaḥ | ramate | pari-jman

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-003

MANTRA NUMBER:

Mantra 3 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 3 of Varga 2 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 60 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ॒शुभि॑श्चि॒द्यान्वि मु॒चाति नू॒नमरी॑रम॒दत॑मानं चि॒देतो॑: । अ॒ह्यर्षू॑णां चि॒न्न्य॑याँ अवि॒ष्याम॒नु॑ व्र॒तं स॑वि॒तुर्मोक्यागा॑त् ॥

The Mantra without meters (Sanskrit)

आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः । अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥

The Mantra's transliteration in English

āśubhiś cid yān vi mucāti nūnam arīramad atamānaṁ cid etoḥ | ahyarṣūṇāṁ cin ny ayām̐ aviṣyām anu vrataṁ savitur moky āgāt ||

The Pada Paath (Sanskrit)

आशुऽभिः॑ । चि॒त् । यान् । वि । मु॒चा॒ति॒ । नू॒नम् । अरी॑रमत् । अत॑मानम् । चि॒त् । एतोः॑ । अ॒ह्यर्षू॑णाम् । चि॒त् । नि । अ॒या॒न् । अ॒वि॒ष्याम् । अनु॑ । व्र॒तम् । स॒वि॒तुः । मोकी॑ । आ । अ॒गा॒त् ॥

The Pada Paath - transliteration

āśu-bhiḥ | cit | yān | vi | mucāti | nūnam | arīramat | atamānam | cit | etoḥ | ahyarṣūṇām | cit | ni | ayān | aviṣyām | anu | vratam | savituḥ | mokī | ā | agāt

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-004

MANTRA NUMBER:

Mantra 4 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 4 of Varga 2 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 61 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः । उत्संहायास्थाद्व्यृ१ तूँरदर्धररमतिः सविता देव आगात् ॥

The Mantra without meters (Sanskrit)

पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः । उत्संहायास्थाद्व्यृतूँरदर्धररमतिः सविता देव आगात् ॥

The Mantra's transliteration in English

punaḥ sam avyad vitataṁ vayantī madhyā kartor ny adhāc chakma dhīraḥ | ut saṁhāyāsthād vy ṛtūm̐r adardhar aramatiḥ savitā deva āgāt ||

The Pada Paath (Sanskrit)

पुनरिति । सम् । अव्यत् । विऽततम् । वयन्ती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः । उत् । सम्ऽहाय । अस्थात् । वि । ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ । अगात् ॥

The Pada Paath - transliteration

punariti | sam | avyat | vi-tatam | vayantī | madhyā | kartoḥ | ni | adhāt | śakma | dhīraḥ | ut | sam-hāya | asthāt | vi | ṛtūn | adardhaḥ | aramatiḥ | savitā | devaḥ | ā | agāt

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-005

MANTRA NUMBER:

Mantra 5 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 5 of Varga 2 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 62 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः । ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥

The Mantra without meters (Sanskrit)

नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः । ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥

The Mantra's transliteration in English

nānaukāṁsi duryo viśvam āyur vi tiṣṭhate prabhavaḥ śoko agneḥ | jyeṣṭham mātā sūnave bhāgam ādhād anv asya ketam iṣitaṁ savitrā ||

The Pada Paath (Sanskrit)

नाना । ओकांसि । दुर्यः । विश्वम् । आयुः । वि । तिष्ठते । प्रऽभवः । शोकः । अग्नेः । ज्येष्ठम् । माता । सूनवे । भागम् । आ । अधात् । अनु । अस्य । केतम् । इषितम् । सवित्रा ॥

The Pada Paath - transliteration

nānā | okāṃsi | duryaḥ | viśvam | āyuḥ | vi | tiṣṭhate | pra-bhavaḥ | śokaḥ | agneḥ | jyeṣṭham | mātā | sūnave | bhāgam | ā | adhāt | anu | asya | ketam | iṣitam | savitrā

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-006

MANTRA NUMBER:

Mantra 6 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 1 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 63 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां काममश्चरताममाभूत् । शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥

The Mantra without meters (Sanskrit)

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां काममश्चरताममाभूत् । शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥

The Mantra's transliteration in English

samāvavarti viṣṭhito jigīṣur viśveṣāṁ kāmaś caratām amābhūt | śaśvām̐ apo vikṛtaṁ hitvy āgād anu vrataṁ savitur daivyasya ||

The Pada Paath (Sanskrit)

सम्ऽआववर्ति । विऽस्थितः । जिगीषुः । विश्वेषाम् । कामः । चरताम् । अमा । अभूत् । शश्वान् । अपः । विऽकृतम् । हित्वी । आ । अगात् । अनु । व्रतम् । सवितुः । दैव्यस्य ॥

The Pada Paath - transliteration

sam-āvavarti | vi-sthitaḥ | jigīṣuḥ | viśveṣām | kāmaḥ | caratām | amā | abhūt | śaśvān | apaḥ | vi-kṛtam | hitvī | ā | agāt | anu | vratam | savituḥ | daivyasya

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-007

MANTRA NUMBER:

Mantra 7 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 2 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 64 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वया॑ हि॒तमप्य॑म॒प्सु भा॒गं धन्वान्वा मृ॑ग॒यसो॒ वि त॑स्थुः । वना॑नि॒ विभ्यो॒ नकि॑रस्य॒ तानि॑ व्र॒ता दे॒वस्य॑ सवि॒तुर्मि॑नन्ति ॥

The Mantra without meters (Sanskrit)

त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः । वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ॥

The Mantra's transliteration in English

tvayā hitam apyam apsu bhāgaṁ dhanvānv ā mṛgayaso vi tasthuḥ | vanāni vibhyo nakir asya tāni vratā devasya savitur minanti ||

The Pada Paath (Sanskrit)

त्वया॑ । हि॒तम् । अप्य॑म् । अ॒प्ऽसु । भा॒गम् । धन्व॑ । अनु॑ । आ । मृ॒ग॒यसः॑ । वि । त॒स्थुः॒ । वना॑नि । विऽभ्यः॑ । नकिः॑ । अ॒स्य॒ । तानि॑ । व्र॒ता । दे॒वस्य॑ । स॒वि॒तुः । मि॒न॒न्ति॒ ॥

The Pada Paath - transliteration

tvayā | hitam | apyam | ap-su | bhāgam | dhanva | anu | ā | mṛgayasaḥ | vi | tasthuḥ | vanāni | vi-bhyaḥ | nakiḥ | asya | tāni | vratā | devasya | savituḥ | minanti

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-008

MANTRA NUMBER:

Mantra 8 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 3 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 65 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- स्वराट्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः । विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥

The Mantra without meters (Sanskrit)

याद्राध्यं वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः । विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥

The Mantra's transliteration in English

yādrādhyaṁ varuṇo yonim apyam aniśitaṁ nimiṣi jarbhurāṇaḥ | viśvo mārtāṇḍo vrajam ā paśur gāt sthaśo janmāni savitā vy ākaḥ ||

The Pada Paath (Sanskrit)

यात्ऽराध्यम् । वरुणः । योनिम् । अप्यम् । अनिऽशितम् । निऽमिषि । जर्भुराणः । विश्वः । मार्ताण्डः । व्रजम् । आ । पशुः । गात् । स्थऽशः । जन्मानि । सविता । वि । आ । अकरित्यकः ॥

The Pada Paath - transliteration

yāt-rādhyam | varuṇaḥ | yonim | apyam | ani-śitam | ni-miṣi | jarbhurāṇaḥ | viśvaḥ | mārtāṇḍaḥ | vrajam | ā | paśuḥ | gāt | stha-śaḥ | janmāni | savitā | vi | ā | akar ity akaḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-009

MANTRA NUMBER:

Mantra 9 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 4 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 66 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः । नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥

The Mantra without meters (Sanskrit)

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः । नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥

The Mantra's transliteration in English

na yasyendro varuṇo na mitro vratam aryamā na minanti rudraḥ | nārātayas tam idaṁ svasti huve devaṁ savitāraṁ namobhiḥ ||

The Pada Paath (Sanskrit)

न । यस्य । इन्द्रः । वरुणः । न । मित्रः । व्रतम् । अर्यमा । न । मिनन्ति । रुद्रः । न । अरातयः । तम् । इदम् । स्वस्ति । हुवे । देवम् । सवितारम् । नमःऽभिः ॥

The Pada Paath - transliteration

na | yasya | indraḥ | varuṇaḥ | na | mitraḥ | vratam | aryamā | na | minanti | rudraḥ | na | arātayaḥ | tam | idam | svasti | huve | devam | savitāram | namaḥ-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-010

MANTRA NUMBER:

Mantra 10 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 5 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 67 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

भगं॑ धियं॑ वा॒जय॑न्तः॒ पुरं॑धिं॒ नरा॒शंसो॒ ग्नास्पति॑र्नो अव्याः । आ॒वे वा॒मस्य॑ संग॒थे र॑यी॒णां प्रि॒या दे॒वस्य॑ सवि॒तुः स्या॑म ॥

The Mantra without meters (Sanskrit)

भगं धियं वाजयन्तः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः । आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥

The Mantra's transliteration in English

bhagaṁ dhiyaṁ vājayantaḥ puraṁdhiṁ narāśaṁso gnāspatir no avyāḥ | āye vāmasya saṁgathe rayīṇām priyā devasya savituḥ syāma ||

The Pada Paath (Sanskrit)

भग॑म् । धिय॑म् । वा॒जय॑न्तः । पु॒र॑म्ऽधिम् । नरा॒शंसः॑ । ग्नाःपतिः॑ । नः॒ । अ॒व्याः॒ । आ॒ऽअ॒ये । वा॒मस्य॑ । स॒म्ऽग॒थे । र॒यी॒णाम् । प्रि॒याः । दे॒वस्य॑ । स॒वि॒तुः । स्या॒म॒ ॥

The Pada Paath - transliteration

bhagam | dhiyam | vājayantaḥ | puram-dhim | narāśaṃsaḥ | gnāḥpatiḥ | naḥ | avyāḥ | āaye | vāmasya | sam-gathe | rayīṇām | priyāḥ | devasya | savituḥ | syāma

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-038/mantra-rig-02-038-011

MANTRA NUMBER:

Mantra 11 of Sukta 38 of Mandal 2 of Rig Veda
Mantra 6 of Varga 3 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 68 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मभ्यं॒ तद्दि॒वो अ॒द्भ्यः पृ॑थि॒व्यास्त्वया॑ द॒त्तं काम्यं॒ राध॒ आ गा॑त् । शं यत्स्तो॒तृभ्य॑ आ॒पये॒ भवा॑त्युरु॒शंसा॑य सवितर्जरि॒त्रे ॥

The Mantra without meters (Sanskrit)

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् । शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥

The Mantra's transliteration in English

asmabhyaṁ tad divo adbhyaḥ pṛthivyās tvayā dattaṁ kāmyaṁ rādha ā gāt | śaṁ yat stotṛbhya āpaye bhavāty uruśaṁsāya savitar jaritre ||

The Pada Paath (Sanskrit)

अ॒स्मभ्य॑म् । तत् । दि॒वः । अ॒त्ऽभ्यः । पृ॒थि॒व्याः । त्वया॑ । द॒त्तम् । काम्य॑म् । राधः॑ । आ । गा॒त् । शम् । यत् । स्तो॒तृऽभ्यः॑ । आ॒पये॑ । भवा॑ति । उ॒रु॒ऽशंसा॑य । स॒वि॒त॒रिति॑ । ज॒रि॒त्रे ॥

The Pada Paath - transliteration

asmabhyam | tat | divaḥ | at-bhyaḥ | pṛthivyāḥ | tvayā | dattam | kāmyam | rādhaḥ | ā | gāt | śam | yat | stotṛ-bhyaḥ | āpaye | bhavāti | uru-śaṃsāya | savitaḥ | jaritre

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-039/mantra-rig-02-039-001

MANTRA NUMBER:

Mantra 1 of Sukta 39 of Mandal 2 of Rig Veda
Mantra 1 of Varga 4 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 69 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ग्रावा॑णेव॒ तदिदर्थं॑ जरेथे॒ गृध्रे॑व वृ॒क्षं नि॑धि॒मन्त॒मच्छ॑ । ब्र॒ह्माणे॑व वि॒दथ॑ उक्थ॒शासा॑ दू॒तेव॒ हव्या॑ जन्या॑ पुरु॒त्रा ॥

The Mantra without meters (Sanskrit)

ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ । ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥

The Mantra's transliteration in English

grāvāṇeva tad id arthaṁ jarethe gṛdhreva vṛkṣaṁ nidhimantam accha | brahmāṇeva vidatha ukthaśāsā dūteva havyā janyā purutrā ||

The Pada Paath (Sanskrit)

ग्रावा॑णाऽइव । तत् । इत् । अर्थ॑म् । ज॒रे॒थे॒ इति॑ । गृध्रा॑ऽइव । वृ॒क्षम् । नि॒धि॒ऽमन्त॑म् । अच्छ॑ । ब्र॒ह्माणा॑ऽइव । वि॒दथे॑ । उ॒क्थ॒ऽशसा॑ । दू॒ताऽइ॑व । हव्या॑ । जन्या॑ । पु॒रु॒ऽत्रा ॥

The Pada Paath - transliteration

grāvāṇāiva | tat | it | artham | jaretheiti | gṛdhrāiva | vṛkṣam | nidhi-mantam | accha | brahmāṇāiva | vidathe | uktha-śasā | dūtāiva | havyā | janyā | puru-trā

Link: www.vedakosh.com/rig-veda/mandal-2/sukta-039/mantra-rig-02-039-002

MANTRA NUMBER:

Mantra 2 of Sukta 39 of Mandal 2 of Rig Veda
Mantra 2 of Varga 4 of Adhyaya 8 of Ashtak 2 of Rig Veda
Mantra 70 of Anuvaak 4 of Mandal 2 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- गृत्समदः शौनकः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

प्रा॒त॒र्याावा॑णा र॒थ्ये॑व वी॒राजे॑व य॒मा व॒रमा सं॑चेथे । मेने॑ इव त॒न्वा॒३॒॑ शुम्भ॑माने॒ दम्प॑तीव क्रतु॒विदा॒ जने॑षु ॥

The Mantra without meters (Sanskrit)

प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे । मेने इव तन्वा शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥

The Mantra's transliteration in English

prātaryāvāṇā rathyeva vīrājeva yamā varam ā sacethe | mene iva tanvā śumbhamāne dampatīva kratuvidā janeṣu ||

The Pada Paath (Sanskrit)

प्रा॒तः॒ऽयावा॑ना । र॒थ्या॑ऽइव । वी॒रा । अ॒जाऽइ॑व । य॒मा । वर॑म् । आ । स॒चे॒थे॒ इति॑ । मेने॑इ॒वेति॒ मेने॑ऽइव । त॒न्वा॑ । शुम्भ॑माने॒ इति॑ । दम्प॑तीइ॒वेति॒ दम्प॑तीऽइव । क्र॒तु॒ऽविदा॑ । जने॑षु ॥

The Pada Paath - transliteration

